# संस्कृतवार्ता:

**दिनाङ्कः-14.12.2025**

**प्रात: - 06:55**

**अथ वार्ताः**

**अमितशाहः-छत्तीसगढ**

केन्द्रीय-गृह-मन्त्रिणा अमितशाहेन उक्तं यत् नक्सल्-वादेन कस्यापि लाभो न भवति, केवलं शान्त्या एव विकासस्य मार्गः प्रशस्तः भविष्यति। छत्तीसगढस्य जगदलपुरे बस्तर-ओलिम्पिक-क्रीडायाः समापनसमारोहं सम्बोधयन्, तेनोदिरितं यत् षड्विंशत्यधिक द्विसहस्रतम वर्षस्य मार्चमासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं नक्सलवादं समूलं विनश्यति। सः अवदत् यत् आगामिषु पञ्चवर्षेषु छत्तीसगढस्य बस्तर-सम्भागं देशस्य सर्वाधिकविकसित-जनजातीय-क्षेत्र-रूपेण परिवर्तयितुं केन्द्रेण निर्णयः स्वीकृतः। गृहमन्त्रिणा अधुनापि तेभ्यः शस्त्राणि समर्पयित्वा समाजस्य मुख्यधारायां सम्मिलितुं प्रार्थितम्।

**अखिल-भारतीय-आयुर्विज्ञान-संस्थानेन**

अखिल-भारतीय-आयुर्विज्ञान-संस्थानेन एम्स नवदिल्ली इत्यनेन सुपर्नोवा-स्टेण्ट इति नूतनस्य उन्नतस्य च स्ट्रोक्-चिकित्सा-यन्त्रस्य भारते प्रथमं चिकित्सकीय-परीक्षणं कृतम्। एम्स इत्यनेन अधोरेखितम् यत् एतत् राष्ट्रस्य प्रथमं स्ट्रोक्-उपकरणम् अस्ति यत् देशीय-चिकित्सकीय-परीक्षणस्य आधारेण अनुमोदितम्। एतेन यन्त्रेन दक्षिणपूर्व-एशियायां त्रिशततोप्यधिकानां रोगिणां उपचारः अभवत्।

**पश्चिमबङ्गालराज्ये-एस्.आई.आर्.**

पश्चिमबङ्गालराज्ये अपरमुख्य-निर्वाचनाधिकारिणा अरिंदम-नियोगिना उक्तं यत् एस्.आई.आर्. प्रक्रियायाः अभियोग-आक्षेप-चरणयोः एकत्रिंशत्-लक्षाधिकाः जनाः विचारणार्थं आगमिष्यन्ति। राज्ये अष्टपञ्चाशल्लक्षाधिकानि गणना-प्रपत्राणि असंकलनीयानि सन्ति।

**ज्योतिरादित्यसिन्धिया-कोल्हापुरनगरे**

केन्द्रीय-संचार-मन्त्रिणा ज्योतिरादित्यसिन्धिया-वर्येण, उक्तं यत् पत्रवाहकः न केवलं पत्राणि, अपितु भारतस्य प्रत्येकस्मिन् गृहे विभिन्नाः सर्वकारीयसेवाः च प्रददातिः, ते विश्वासस्य सेतुः सन्तीति वर्णितवान्। सः ग्रामीणभारतं संयोजने राष्ट्रस्य विकासे च तेषां महत्त्वपूर्णां भूमिकां प्रकाशितवान्। श्रीसिन्धिया ह्यः कोल्हापुरनगरे आयोजिते ग्रामीण-डाक-सेवक-सम्मेलने गोवा-पुणे-प्रदेशयोः प्रायः षट्सहस्रं यावत् ग्रामीण-डाक-सेवक इत्येतेषां विशालसमागमं सम्बोधयन् एतत् उक्तवान्।

**गिरिराज्-सिंहेन-हस्तशिल्प**

केन्द्रीय-वस्त्र-मन्त्रिणा गिरिराज-सिंहेन उक्तं यत् हस्तशिल्प-उद्योगस्य निर्यातः प्रायः पञ्चाशत्-सहस्र-कोटि-रूप्यकाणि अस्ति, तथा च शीघ्रमेव एकलक्ष-कोटि-रूप्यकाणि यावत् वर्धयितुं शक्यते। नवदिल्ल्यां क्राफ़्टेड् फ़ार् द फ़्यूचर् इत्यस्य तृतीयसंस्करणस्य उद्घाटनावसरे श्रीसिंहः एतत् उक्तवान्।

दिल्ली-एन्. सी. आर्.-वायुगुणवत्तायाः

दिल्ली-एन्.सी.आर्. क्षेत्रे वायुगुणवत्ता निम्नस्तरं प्राप्तेः अनंतरं वायुगुणवत्ता प्रबन्धन-आयोगेन (सी.ए.क्यू.एम्.) इत्यनेन तत्क्षणप्रभावेन ग्रेडेड्-रिस्पान्स्-एक्शन्-प्लान् (ग्रैप) इत्यस्य तृतीयं चरणं समारब्धम्। निर्णयोयं नगरे वायुगुणवत्ता सूचकाङ्कः गम्भीर-श्रेण्यानन्तरं गृहीतः। एतत् पूर्वमेव प्रवृत्तस्य ग्रैप इत्यस्य प्रथम-द्वितीय-चरणयोः अन्तर्गतेषु कार्येषु अतिरिक्तम् अस्ति। प्रतिबन्धेषु अत्यावश्यक-निर्माण-विध्वंसादि कार्याणि पूर्णतया प्रतिबन्धितानि भविष्यन्ति।

पुरुष-क्रिकेट्

पुरुष-क्रिकेट्-क्रीडायां, भारतीयदलं अद्य धर्मशालानगरे तृतीयायां विंशति प्रति विंशति-अन्ताराष्ट्रिय-क्रीडायां दक्षिण-आफ्रिका-दलं सम्मुखी करिष्यति। हिमाचलप्रदेशक्रिकेट्-सङ्घस्य क्रीडाङ्गणे सायं सप्तवादने क्रीडायाः आरम्भः भविष्यति।

संस्कृत - साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।

।।इति वार्ताः।।